# Shri Bala Makaranda Stava

# શ્રીબાલામકરન્દસ્તવઃ

## Document Information

Text title : Shri Bala Makaranda Stava

File name : bAlAmakarandastavaH.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH, rudrayAmala

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.



March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલામકરન્દસ્તવઃ

શ્રીરુદ્ર ઉવાચ-
શૃણુ દેવિ પ્રવક્ષ્યામિ મકરન્દસ્તવં શુભમ્ ।
ગોપ્યાદ્ગોપ્યતરં ગોપ્યં મહાકૌતૂહલં પરમ્ ॥ ૧॥

બાલાયાઃ પરમેશાન્યાઃ સ્તોત્રચૂડામણિઃ શિવે ।
મકરન્દસ્ય સ્તોત્રસ્ય ઋષિર્નારદસંજ્ઞકઃ ॥ ૨॥

છન્દોઽનુષ્ટુપુદાખ્યાતં શ્રીબાલા દેવતા સ્મૃતા ।
ઐં બીજં શક્તિઃ સૌઃ પ્રોક્તં કીલકં ક્લીં તથૈવ ચ ॥ ૩॥

ભોગમોક્ષસ્ય સિદ્ધ્યર્થે વિનિયોગઃ પ્રકીર્તિતઃ ।
નમસ્તેઽસ્તુ પરાં શક્તિં નમસ્તે ભક્તવત્સલે ॥ ૪॥

નમસ્તેઽસ્તુ ગુણાતીતાં બાલાં સિદ્ધિપ્રદામ્બિકામ્ ।
ભવદુઃખાબ્ધિતરણીં પરં નિર્વાણદાયિનીમ્ ॥ ૫॥

ધનદાં જ્ઞાનદાં સત્યાં શ્રીબાલાં પ્રણમામ્યહમ્ ।
સિદ્ધિપ્રદાં જ્ઞાનરૂપાં ચતુર્વર્ગફલપ્રદામ્ ॥ ૬॥

આધિવ્યાધિહરાં વન્દે શ્રીબાલાં પરમેશ્વરીમ્ ।
ઐઙ્કારરૂપિણીં ભદ્રાં ક્લીઙ્કારગુણસમ્ભવામ્ ॥ ૭॥

સૌઃકારરૂપરૂપેશીં બાલાં બાલાર્કસન્નિભામ્ ।
ઊર્ધ્વામ્નાયેશ્વરીં દેવીં રક્તાં રક્તવિલેપનામ્ ॥ ૮॥

રક્તવસ્ત્રધરાં સૌમ્યાં શ્રીબાલાં પ્રણમામ્યહમ્ ।
રાજરાજેશ્વરીં દેવીં રજોગુણાત્મિકાં ભજે ॥ ૯॥

બ્રહ્મવિદ્યાં મહામાયાં ત્રિગુણાત્મકરૂપિણીમ્ ।
પઞ્ચપ્રેતાસનસ્થાં ચ પઞ્ચમાકારભક્ષકામ્ ॥ ૧૦॥

પઞ્ચભૂતાત્મિકાં ચૈવ નમસ્તે કરુણામયીમ્ ।

સર્વદુઃખહરાં દિવ્યાં સર્વસૌખ્યપ્રદાયિનીમ્ ॥ ૧૧॥

સિદ્ધિદાં મોક્ષદાં ભદ્રાં શ્રીબાલાં ભાવયામ્યહમ્ ।
નમસ્તસ્યૈ મહાદેવ્યૈ દેવદેવેશ્વરિ પરે ॥ ૧૨॥

સર્વોપદ્રવનાશિન્યૈ બાલાયૈ સતતં નમઃ ।
ગુહ્યાદ્ગુહ્યતરાં ગુપ્તાં ગુહ્યેશીં દેવપૂજિતામ્ ॥ ૧૩॥

હરમૌલિસ્થિતાં દેવીં બાલાં વાક્સિદ્ધિદાં શિવામ્ ।
વ્રણહાં સોમતિલકાં સોમપાનરતાં પરામ્ ॥ ૧૪॥

સોમસૂર્યાગ્નિનેત્રાં ચ વન્દેઽહં હરવલ્લભામ્ ।
અચિન્ત્યાકારરૂપાખ્યાં ઓઙ્કારાક્ષરૂપિણીમ્ ॥ ૧૫॥

ત્રિકાલસન્ધ્યારૂપાખ્યાં ભજામિ ભક્તતારિણીમ્ ।
કીર્તિદાં યોગદાં રાદાં સૌખ્યનિર્વાણદાં તથા ॥ ૧૬॥

મન્ત્રસિદ્ધિપ્રદામીડે સૃષ્ટિસ્થિત્યન્તકારિણીમ્ ।
નમસ્તુભ્યં જગદ્ધાત્રિ જગત્તારિણિ ચામ્બિકે ॥ ૧૭॥

સર્વવૃદ્ધિપ્રદે દેવિ શ્રીવિદ્યાયૈ નમોઽસ્તુ તે ।
દયારૂપ્યૈ નમસ્તેઽસ્તુ કૃપારૂપ્યૈ નમોઽસ્તુ તે ॥ ૧૮॥

શાન્તિરૂપ્યૈ નમસ્તેઽસ્તુ ધર્મરૂપ્યૈ નમો નમઃ ।
પૂર્ણબ્રહ્મસ્વરૂપિણ્યૈ નમસ્તેઽસ્તુ નમો નમઃ ॥ ૧૯॥

જ્ઞાનાર્ણવાયૈ સર્વાયૈ નમસ્તેઽસ્તુ નમો નમઃ ।
પૂતાત્માયૈ પરાત્માયૈ મહાત્માયૈ નમો નમઃ ॥ ૨૦॥

આધારકુણ્ડલીદેવ્યૈ ભૂયો ભૂયો નમામ્યહમ્ ।
ષટ્ચક્રભેદિની પૂર્ણા ષડામ્નાયેશ્વરી પરા ॥ ૨૧॥

પરાપરાત્મિકા સિદ્ધા શ્રીબાલા શ્ચરણં મમ ।
ઇદં શ્રીમકરન્દાખ્યં સ્તોત્રં સર્વાગમોક્તકમ્ ॥ ૨૨॥

સ્તોત્રરાજમિદં દેવિ ધારય ત્વં કુલેશ્વરિ ।
પુણ્યં યશસ્યમાયુષ્યં દેવાનામપિ દુર્લભમ્ ।
પાઠમાત્રેણ દેવેશિ સર્વારિષ્ટં વિનશ્યતિ ॥ ૨૩॥

ઇતિ રુદ્રયામલતઃ શ્રીબાલામકરન્દસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Shri Bala Makaranda Stava*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*